National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 59-61
© 2025 NJHSR
www.sanskritarticle.com

**डा.दयानन्दपाणिग्राही**
सहायकाचार्यः, अद्वैतवेदान्तविभागः, कलियाचकविक्रमकिशोरआदर्शसंस्कृत-महाविद्यालयः, हेरिया, पूर्वमेदिनीपुरम्, पश्चिमवंगः

**Correspondence:**
**डा.दयानन्दपाणिग्राही**
सहायकाचार्यः, अद्वैतवेदान्तविभागः, कलियाचकविक्रमकिशोरआदर्शसंस्कृत-महाविद्यालयः, हेरिया, पूर्वमेदिनीपुरम्, पश्चिमवंगः

# रम्भाशुकसम्वादस्य परिशीलनम्

**डा. दयानन्दपाणिग्राही**

**शोधसारः**

भारतीयमनीषायाः श्रीमद्भागवतं पुराणं तादृक् परिणतं फलमस्ति यस्मिन् अस्याः संपूर्णानामपि ज्ञानानामानन्देन सह एकीभूय परममधुसुधारुपेण अद्यापि भावुकानां रसिकानाञ्च श्रुतिपेयतामुपायाति। अद्यापि यस्मिन् बहुशः उत्पद्यन्ते समस्याः प्रचेष्टन्ते च नैकमतमतान्तरकषायितान्तःकरणा अशरणाः जनाः। अद्यापि एवमाश्रित्य शान्तिं प्राप्नुवन्ति विवादग्राहग्रासिताः विक्षिप्तमानमानसाः विद्वांसः। उक्तं च भागवतसन्दर्भे जीवगोस्वामीनोक्तं - वेदः पुराणं काव्यं च प्रभुर्मित्रं प्रीयेव च। बोधयन्तीति प्राहुर्विवृद् भागवतं पुनः ।।इति। एतस्मिन् प्रतिपादिताः आख्यायिकाः न केवलं जनमानसं रञ्जयन्ति अपि तु तात्त्विकविषयाणां रहस्यमुद्घाट्य दार्शनिकतत्त्वानि च सम्यग् विविच्य समाजिकानां महते कल्याणाय स्वज्ञानाग्रयः प्रकाशयन्ति।

**कूटशब्दाः - श्रीमद्भगवतम्, महापुराणम्, रम्भाशुकसम्वादः, श्रीशुकदेवः, भागवतकथा।**

**शोधपत्रमुख्यांशः**

श्रीमद्भागवतमहापुराणस्येदं महत्त्वमस्ति यत् – यदि कश्चित्पुराणमेतदश्रुतं नाधीतञ्च तस्य जीवनं तु वृथा एव भवति। तदुक्तं-

**यैर्न श्रुतं भागवतं पुराणं नाराधितो यैः पुरुषः पुराणः।**
**हुतं मुखे नैव धरामराणां तेषां वृथा जन्म गतं जराणाम्।।**[1]

एवं रीत्या एव लिखितो वर्तते- रम्भाशुकसम्वादः इति ग्रन्थविशेषः। यस्य मूलाधारं श्रीमद्भागवतपुराणमेव। यत्र रम्भाशुकसम्बादः इदानीन्तने काले अप्राप्तप्रचुरप्रचारः लुप्तप्रायतां वा गतोऽस्ति। काव्यमिदं शैलीभेदेन तदेव वैशिष्ट्यं बिभर्त्ति यत् भर्तृहरिकृतं शतकद्वयं श्रृङ्गारशतकं वैराग्यशतकञ्च। अत्र रम्भाशुकसंवादव्याजेन प्रवृत्तिनिवृत्तिमार्गयोः मिथः संवादः काव्यगतं चमत्कारितामतितरां पुष्णाति।

**कथायाः सन्दर्भ एवमस्ति –**

रम्भा या स्वर्गस्याप्सरा (अप्सरा) श्रीशुकदेवं परीक्षितुमागतवती। श्रीशुकदेवः स्वभावतः एकान्त-वासी आसीत्। सः बाल्यकालादेव एव वनं गतः आसीत्। स एव भागवतपुराणं राजानं परीक्षितं कथयति स्म। जन्मकाले महर्षिवेदव्यासस्य अयोनिजः पुत्रः स जातस्मरः वैराग्यकारणात् द्वादशवर्षपर्यन्तं मातुः गर्भे एव स्थितवान्। माया प्रभावस्तवोपरि न भविष्यति इति श्रीकृष्णस्य आश्वासनानन्तरं सः जनिं लब्धवान्। तस्य गर्भे एव वेदोपनिषद्दर्शनपुराणादिज्ञानम् आसीत्। सः अल्पवयसि एव ब्रह्मणि लीनः अभवत्। तं दृष्ट्वा रम्भा मुग्धा भूत्वा अप्रार्थयत्। शुक्देवः तं प्रति ध्यानं न दत्तवान्। रम्भा तस्य ध्यानमाकर्षयितुं प्रयत्नम् समारभत्। यदा सा बहु प्रयत्नं कृतवती तदा शुकदेवः पृष्टवान्, देवि, किमर्थं मम ध्यानमाकर्षयसि। रम्भा अवदत्, येन वयं जीवनस्य पूर्णतया आनन्दं लब्धुं शक्नुमः तदर्थं यत्नं करोमि। शुक्देव उवाच देवि, मया तत् सार्थकं तत्त्वं प्राप्तम्, यस्मात् क्षणं त्यक्त्वा जीवनं निरर्थकं भवति। अहं तं रसं त्यक्त्वा जीवनं निरर्थकं कर्तुम् न इच्छामि। किमपि अधिकं रुचिः अस्ति चेदपि मया किं कर्तव्यम्? रम्भा स्वस्य रूपस्य, सौन्दर्यस्य च लक्षणं कथयति स्म। सा अवदत् यत् न केवलं तस्याः शरीरात्

सौन्दर्यस्य अक्षयधारा प्रवहति, सुकुमारगन्धतरङ्गाः अपि प्रवहन्ति। देवलोके यत्र सा निवसति तत्र कदापि कोऽपि वृद्धः न भवति। शुक्देवः एतत् श्रुत्वा अवदत् - देवि अद्य प्रथमवारं वयं ज्ञातवन्तः यत् स्त्रीशरीरम् एतावत् सुन्दरम् अस्ति। भवत्याः प्रसादात् एतत् सम्भवम्। इदानीं यदि मम ईश्वरप्रेरणया पुनर्जन्म भवितुमर्हति तर्हि नवमासान् यावत् भवद्विधायाः मातुः गर्भे स्थित्वा तस्य आनन्दं लप्स्यते। अधुना ईश्वरस्य कार्यं सर्वाधिकं महत्त्वपूर्णम् अस्ति इति। एतेन तस्या अपि वैराग्यं सञ्जातम् इति कथा। अत्र रम्भा अर्पणस्य प्रतीकरूपा तथा श्रीशुक्देवश्च मोक्षस्य प्रतीक इति गणनीयम्। अस्य संवादस्य लेखकः अज्ञातः अस्ति । अयं संवादः आचार्यपरम्परातः निष्पन्नः, परन्तु सः अतीव प्रसिद्धः अस्ति ।

**ग्रन्थप्रसङ्गः**

तत्र यदा भगवतः व्यासदेवकृतप्रयासः सार्थको नाभूत् तथा भगवान् शुकदेवः प्रव्रज्यायै अगमत् तदा अत्यन्तं विरहः सन् श्रीवादरायणः उवाच हे पुत्र हे पुत्र इति । अतः श्रीमद्भागवतस्यायं श्लोकः तदवसरे नितरां स्मर्यते –

**यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातरः आजुहान।**
**पुत्रैति तन्मयतया तरवोऽभिनेदु स्तं सर्वभूतहृदयं मुनिमान-तोऽस्मि।।**[2]

प्रव्रज्यायै गम्यमानं शुकदेवं निवृत्तिमार्गात् प्रवृत्तिमार्गं प्रवर्तयितुं भगवता व्यासेन रम्भा आदिष्टा। तदेवात्र रम्भाशुकसम्बादः इत्याख्यः गूढप्रयासः। रम्भामुखात् अनेकप्रवृत्तिमार्गपरकोपदेशप्रदानसत्त्वेऽपि श्रीशुकदेवेन कथं तान् निवृत्तिमार्गाय प्रचोदयान् तदेवात्र प्रदर्शितं रम्भाशुकसम्बादे।

सन्दर्भिते काव्ये ऊनचत्वारिंशत् श्लोकाः सन्ति यत्र शैलीत्रयमाधारीकृत्य कृतं वर्त्तते। प्रथमाशैली तत्र- पादस्थ अन्तिमवर्णैरेव द्वितीयपादस्यारम्भः दृश्यते उभयोः पक्षयोः । यथा-

रम्भा वदति-मार्गे मार्गे नूतनश्चूतखण्डः खण्डे खण्डे कोकिलानां विरावः।

**रावे रावे मा नीमानभङ्गो भङ्गे भङ्गे पञ्चवाणप्रसङ्गः।।**[3]

हे शुक! मार्गे मार्गे नूतनं नवीनं चूतानाम् आम्रवृक्षाणां । अस्ति इति शेषः। तस्मिन्खण्डे कोकिलानां परभृतां विरावः शब्दः भवति। तस्मिन् विरावे जाते सति मानिन्याः मानवत्याः मनः गर्वः तस्य भङ्गो नाशः भवति। मानिन्या अपि मानभङ्गः किं पुनः साधारणस्त्रीणाम्। तस्मिन् भङ्गे पञ्चबाणाः यस्य सः मन्मथः प्रभवति।

तदुत्तरे श्रीशुकः वदति-

**मार्गे मार्गे जायते साधुसङ्गः सङ्गे सङ्गे श्रूयते कृष्णकीर्त्तिः।**
**कीर्त्तौ कीर्त्तौ नस्तदाकारवृत्ति-र्वृत्तौ वृत्तौ सच्चिदानन्दभासः।।**[4]

रंभे! मार्गे मार्गे साधूनां सज्जनानां संगः परिचयः सङ्गतिश्च जायते। तस्मिन् सङ्गे कृष्णस्य प्रभोः कीर्तिः यशः श्रूयते। तस्यां कीर्तौ नः अस्माकं तस्याकारस्याकार इव वृत्तिः भवति । तस्यां तदाकारवृत्तौ सच्चिदानन्दस्य ईश्वरस्य भासः प्रकाशः भवति अनुभूयते इत्यर्थः।

अपि च –

**तीर्थे तीर्थे निर्मलं ब्रह्मवृन्दं वृन्दे वृन्दे तत्त्वचिन्तानुवादः।**
**वादे वादे जायते तत्त्ववोधो बोधे बोधे भासते चन्द्रचूडः।।**[5]

तीर्थे पवित्रक्षेत्रे । निर्मलं पवित्रं ब्रह्मविदां ब्राह्मणानां वृन्दं समूहः वर्तते। तस्मिन् वृन्दे तत्त्वस्य तत्त्वज्ञानस्य। चिन्तायाः विचारस्यानुवादो विवादे जाते तस्मिन् तत्त्वस्य तत्त्वज्ञानस्य बोधः ज्ञानं जायते भवति । जायमाने तस्मिन् बोधे चन्द्र इन्दुश्चूडे शिरसि यस्य सः ईश्वरः शङ्करः दृश्यते इत्यर्थः।

द्वितीयाशैली समस्यापूर्त्तिरुपा- वृथा गतं तस्य नरस्य जीवनम् इति। रम्भाशुकौ उभवापि एकां समस्यां प्रवृत्तिः एवं निवृत्तिरुपां यथाक्रमं कथं वा प्रतिपादितवन्तौ । किञ्च समाजस्य कृते उपदेशमपि दत्तवन्तौ तस्योदाहरणं दृश्यते । प्रवृत्तिरुपा-

**विशालवेणी नयनाभिगमा कन्दर्पसम्पूर्णनिधानरम्या।**
**भुक्ता न चेनैव वसन्तकाले वृथागतं तस्य नरस्य जीवनम्।।**[6]

अत्र नारीणां भौतिकसौन्दर्यस्य वर्णनां कविना अकारि । एतादृशं रुपसौन्दर्यं प्राप्तुं न कोऽपि वा जनः कथमिच्छेत्। परन्तु श्रीशुकः तत्र सर्वमेव नाशाय भवति इति प्रदर्शयामास । यथा-

**मायाकरण्डी नरकस्य हण्डी तयो विखण्डी सुकृतस्य भण्डी।**
**नृणां वितण्डी चिरसेविता चेद् वृथा गतं तस्य नरस्य जीवितम्।।**[7]

मायायाः करण्डी ।संसारस्यास्य कारणमस्ति माया। तदर्थमेव जीवस्य बन्धनम्। तादृशी माया एवास्ति स्त्री। तथा नरकस्य रौरवादिकस्य हण्डी, तपसो नियमस्य विखण्डी नाशं कुर्वाणा । सुकृतस्य पुण्यस्य भण्डी नाशं कुर्वाणा, नृणां विखण्डी, यएतादृशी स्त्रीफ चिरं चिरकालं सेविता चेत् तस्स्य पुंसः जीवितं वृथा गतम् ।

एवं च -

**समाधिहन्त्री जनमोहयत्री धर्मे कुमन्त्री कपटस्य तन्त्री।**
**सत्कर्महन्त्री कलिता च येन वृथागतं तस्य नरस्य जीवितम्।।**[8]

समाधेर्नियमस्य हन्त्री नाशं कुर्वाणा । जनान्मोहयतीति जन-संमोह-कारिणी । धर्मे कुमन्त्री कुत्सितोपदेशकारिणी। कपटस्य प्रपञ्चस्य तन्त्री सत्कर्मणि घ्नन्ति इति तथा भूता, येन कलिता सेविता तस्य जन्म वृथा गतमिति।

अन्तिमशैली अपि समस्यापूर्त्तिरुपा , परन्तु अत्र समस्यारुपं भिन्नम् । ततः किं ततः किम् ततः किम् ततः किम् इति । अत्र अन्तिमश्लोकद्वयं केवलम् आम्नायसिद्धान्तप्रतिपादकपूर्वकं जगन्मिथ्याद्योतकं च वर्त्तते । तद्यथा-

**सुगन्धैः सुपुष्पैः सुशय्या सुकान्ता**
**वसन्त ऋतुः पूर्णिमा पूर्णचन्द्रः ।**
**यदानास्ति पुंस्त्वं नरस्य प्रभूतं**
**ततः किं ततः किं ततः किं ततः किम्।।**[9]

एवं संसारस्य भौतिकमापाद्य तस्य श्रेष्ठतायाः पराकाष्ठा प्रदर्शिता । परन्तु भारतीयमनीषया कदापि भौतिकवादः नैव प्रशंसितम् । अतः भगवान् श्रीशुकदेव अपि भौतिकतां कथमध्यात्म-मार्गे योजयितुं शक्यते तद् निरुपयति-

**सुरुपं सुरम्यं नवीनं कलत्रं**
**धनं मेरुतुल्यं वचश्चारु चित्रम् ।**
**दूरेरङ्घ्रिपद्मे मनश्चेदलग्नं**

**ततः किं ततः किं ततः किं ततः किम्।**[10]

सुष्टु रूपं यस्य तत्सुरूपं शरीरम्. नवीनं नूतनं कलत्रं युवती स्त्री, मेरुणा तुल्यं धनं द्रव्यं, चारु सुन्दरं प्रियं चित्रमलङ्कारयुक्तं वचः वाक्यं, उपरि सर्ववर्णितमस्ति; किन्तु, हरेः ईश्वरस्य अंघ्रियुग्मे चरणकमलयुग्मे मनः अन्तःकरणं न लग्नं चेत्तेन सुरूपशरीरादिना किं? न किमपीत्यर्थः; अतो मोहं विहाय सच्चिदानन्दाध्येतव्य इत्यर्थः॥

पद्यमिदं श्रीशङ्कराचार्यविरचिते गुर्वष्टके प्रथमे पद्ये सामान्य-परिवर्तनेन प्राप्यते यथा –

**शरीरं सुरूपं तथा वा कलत्रं**
**यशश्चारु चित्रं धनं मेरुतुल्यम्।**
**मनश्चेन्न लग्नं गुरोरङ्घ्रिपद्मे**
**ततः किं ततः किं ततः किं ततः किम्॥**[11]

एवं रम्भया येन केनापि कृतेन निवेदनेन नैव पराजितः सन् भगवान् श्रीशुकः शब्दचातुर्य्या अध्यात्मिकभावनया चैव रम्भां प्रवोधयामास। अत्र रम्भाशुकसम्बादे शब्दचातुर्य्या आध्यात्मिकतयाश्च अपूर्वं निर्दशनं प्राप्तुं शक्यते इति शम् ।

**सन्दर्भसूची**


1. रम्भशुकसम्वादः, सम्पादकः - प्रो.गङ्गाधरपण्डा, सम्पूर्णानन्द-विश्वविद्यालयः,वाराणसी
2. श्रीशङ्कराचार्यस्तोत्रसंग्रहः -गुर्वष्टकम्, श्रीविश्वनाथग्रन्थामाला, अपारनाथमठः, ढुण्ढिराजगणेशः, काशी
3. श्रीमद्भागवतमहापुराणम्, व्यासदेवः गीताप्रेसगोरक्षपुरम्।

**Web Link**

1.https://sanskritdocuments.org/~sanskrit/doc_trial/fortransfer/shukarambhAsamvAda_sa.html


**पादटिप्प्ण्यः**

[1] गर्गसंहिता6/13/11

[2] श्रीमद्भगवतम्.श्लो.2

[3] रम्भाशुकसम्वादे श्लोक-1

[4] तत्रैव श्लोक- 02

[5] तत्रैव श्लोक- 03

[6] तत्रैव श्लोक- 24

[7] तत्रैव श्लोक- 26

[8] तत्रैव श्लोक- 27

[9] तत्रैव श्लोक- 38

[10] तत्रैव श्लोक- 39

[11] गुर्वष्टकम् - 11